वर्षम्-०३ अङ्कः-०३ शोधज्योतिः
जनवरी-दिसम्बर, २०२१ ISSN-2350-0700

# कालिदाससाहित्ये पशुपक्षिणां सङ्गीतकलायाः परिशीलनम्

**डॉ. हीरालाल दाश**[१]

## प्रस्तावना

**मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।**
**षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखण्डिभिः ।।**

संस्कृतवाङ्मये साहित्यशास्त्रे राराज्यमानेषु महाकविषु कविकुलगुरोः कविकुलचक्रवर्तिनः कविताकामिनीकान्तस्य कवीश्वरस्य महाकवेः कालिदासस्य स्थानं सर्वोत्कृष्टं भजतेतराम् । तस्य च कालिदास-कालदास-चन्द्रमौली-देवव्रत-ईश्वरकृष्ण-दीपशिखादयः नामविशेषाः श्रूयन्ते। महाकवेः कालिदासस्य काव्यकला तादृशी भवति यत्र चित्रकलाः मूर्तिकलाः नृत्यकलाः सङ्गीतकलाश्च अनस्यूततया प्रवहमानाः दरीदृश्यन्ते ।

सम् (सम्यक्) इत्युपसर्गपूर्वकं गै इति धातुना क्त प्रत्यये सङ्गीतशब्दोऽयं समजनि । आचार्यभरतमुनेः स्पष्टमिदं मतं भवति यत् गीतं नाटकस्य नैकेषु प्रमुखाङ्गेषु श्रेष्ठं भवति । वाद्यं नृत्यं तु गीतस्य अनुगामी भवति। नाट्यान्तर्गततया गीतं वाद्यं नृत्यञ्च प्राचुर्येण अधुना परिलक्ष्यते । तेन नाटकं **तौर्यत्रिक**मिति संज्ञया आख्यायते । अत एव गीतं वाद्यं नृत्यरूपं सङ्गीतस्य उपादानानि निर्दिश्य मेघदूते सङ्गीतार्थपदं प्रयुक्तं महाकविना कालिदासेन।प्रसङ्गेऽस्मिन् उक्तं हि –

**शब्दायन्ते मधुरमनिलः कीचकाः पूर्य्यमाणाः**
**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नराभिः ।**
**निर्ह्लादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्**
**संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।1**

---

[१] Associate Professor, Dept.of Sanskrit, MSCBD University, Keonjhar Campus, Keonjhar, Pin- 758002 (Odisha)

विष्णुधर्मोत्तरपुराणानुसारं वाद्यं नृत्यञ्च गीतस्य अनुगामिनौ भवतः । भारतीयजनश्रुतिरपि वर्तते यत् वैवस्ततमन्वन्तरे त्रेतायुगारम्भे एकदा इन्द्रादयः देवाः भगवन्तं ब्रह्माणं प्रार्थयन् दृश्यं श्रव्यञ्च क्रीडनीयकमभिलषितवन्तः।उक्तं हि नाट्यशास्त्रे प्रथमाध्याये –

**त्रेतायुगे संप्रवृत्ते मनोर्वैवस्ततस्य च ।।**
**महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।**
**क्रीडनीयकमिच्छामः दृश्यं श्रव्यं च यद्भवेत् ।।2**

महर्षिः भरतोऽपि नाट्यवेदस्य शिक्षां प्राप्य स्वपुत्रान् शिक्षाम् अददात् । भगवान् ब्रह्मा स्वातिस्तथा तस्य शिष्यान् वाद्यं एवञ्च नारदं गन्धर्वं च गानकार्येषु नियोजयामास । उक्तं हि –

**स्वातिर्भाण्डानियुक्तस्तु सह शिष्यैः स्वयम्भुवा ।**
**नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः ।। 3**

कालिदाससाहित्ये नैके पशवः पक्षिणश्च सुवर्णिताः निरूपिताश्च अभुवन् । स च महाकविः तेषां पशूनां पक्षिणां च माध्यमेन सङ्गीतस्योत्पत्तिः अनुभवश्च नैकेषु स्थानेषु वर्णयामास। प्राचीनपरम्परानुसारं सङ्गीतस्य ये सप्तस्वराः सन्ति, तेषामुत्पत्तिः पशुपक्षिणां ध्वनिषु अभूत्। दामोदरपण्डितस्य सङ्गीतदर्पणानुसारं मयूरात् षडजः, चातकात् ऋषभः,अजात् गान्धारः, क्रौञ्चात् मध्यमः, कोकिलात् पञ्चमः दर्दुरात् धैवतं, तथा गजात् निषादस्योत्पत्तिरजायत । प्रसङ्गेऽस्मिन् उक्तं यथा –

**षड्जं वदति मयूरः पुनः स्वरमृषभं चातको ब्रूते ।**
**गान्धाराख्यं छागो निगदति च मध्यमं क्रौञ्चः ।।**
**गदति पञ्चममञ्चितवाक् पिको रटति धैवतमुन्मददर्दुरः ।**
**शृणिसमाहतमस्तककुञ्जरो गदति नासिकया स्वरमन्तिकम् ।।4**

शाङ्र्गदेवेन प्रणीते सङ्गीतरत्नाकरे सङ्गीतस्य स्वरूपं निरूपितमवलोक्यते । गायनं,वादनं,नृत्यञ्च त्रयः मिलित्वा सङ्गीतं भवति। उक्तं यथा –

**गातं वाद्यं तथा नृत्यं त्रयः सङ्गीतमुच्यते ।।5**

भर्तृहरेः मतानुसारं मनुष्यकोटिषु परिगणयितुं साहित्यसङ्गीतयोरावश्यकता अवश्यमेव स्वीकर्तव्यम् । येषां साहित्यसङ्गीतयोः ज्ञानं नास्ति ते अस्मिन् मर्त्यलोके मनुष्यरूपेण स्थित्वापि पशुवत् जीवन्ति । उक्तं हि नीतिशतके –

**साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।**
**तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।6**

नैषधीयचरितस्य कर्ता महाकविः श्रीहर्षोऽपि तौर्यत्रिक-नृत्य-गीत-वाद्यत्रयं सङ्गीतम् आनन्दस्वरूपं तथा आनन्दसाधनरूपं भवतीति प्रमाणीचकार।तेन वने राजा नलः स्मरेण उपतप्तोऽतौर्यत्रिकम् अनुभवतीति निरूपितम् । प्रसङ्गेऽस्मिन् उक्तं यथा –

**विलासवापीतटवीचिवादनात्**
**पिकालिगीतेः शिखिलास्यलाघवात् ।**
**वनेऽपि तौर्यत्रिकमारराध तं**
**क्व भोगमाप्नोति न भाग्यभाग्जनः ।।7**

एवञ्चात्र पशुपक्षिणामपि सङ्गीतकला स्वस्वकूजनादिषु कथनमनुमीयते । तत्सर्वमपि कालिदाससाहित्ये प्रमाणीकर्तुं शक्यते । तदत्र किञ्चित् प्रमाणपुरस्सरम् अधस्तान्निरूप्यते ।

## शोधपत्रस्यास्य उद्देश्यम्

कविताकामिनीकान्तस्य कनिष्ठिकाधिष्ठतस्य महाकवेर्कालिदासस्य काव्यानामुपरि बहुधा बहुभिश्च अध्ययनं शोधप्रबन्धाश्च लिखिताः वर्तन्ते। तस्य साहित्ये न्याय-वेदान्त-मीमांसादीनि दर्शनानि ,कामशास्त्राणि,मूर्तिकलाः,सङ्गीतकलाः,शृङ्गाररसस्य अन्येषां च रसानां प्रवाह्मानाः दरीदृश्यन्ते । परन्तु कालिदासः न केवलं शृङ्गारी कविः अपि तु पर्यावरणस्योपरि तथा पशूनां पक्षिणाञ्चोपरि तस्य दृष्टिः विचित्रैव भवति। सच महाकविः तेषां पशुपक्षणिणां स्वरादिकं नृत्यवाद्यगीतादीन् वर्णयितुं समर्थोऽभूत्।तेषां पशुपक्षिणां सुसमीचीनं वर्णनं कालिदासेन कृतम्। अत एव तस्य साहित्ये नैकेषु काव्येषु च पशुपक्षिणां सङ्गीतकलायाः उपरि शोधपत्रमिदं लिखितं वर्तते । तेन शोधपत्रस्यास्य शीर्षकं **"कालिदाससाहित्ये पशुपक्षिणां सङ्गीतकलायाः परिशीलनम्"** इति स्थापितम्। शोधपत्रमिदं निश्चितरूपेण साहित्यरसपिपासकानां सङ्गीतकलाया उपरि महत्वं प्रदत्तवतां सहृदयानां मनः आकर्षयतीति विश्वस्यते ।

## कालिदाससाहित्ये पशूनां सङ्गीतकलायाः परिशीलनम्

कविताकामिनीकान्तस्य कविचक्रवर्तिनः महाकवेः कालिदसस्य प्रायः सर्वेष्वपि काव्येषु पशूनां गर्जनादिकं रवः , तेन च सङ्गीतस्य भावः अभिव्यज्यते । सङ्गीतस्य यः अन्तिमः स्वरः निषादः, तेन कुञ्जरस्य (गजस्य)स्वरः स्वीक्रियते । मदोन्मत्तस्य गजस्य गम्भीरगर्जनेनापि सङ्गीतस्य स्वरूपं भवतीति कालिदासः प्रमाणयति । यत्तु गर्जनं वीररसम् अभिव्यनक्ति। कुञ्जरगर्जनस्य नैकान्युदाहरणानि कुमारसम्भवस्य चतुर्दशसर्गे परिलक्ष्यन्ते ।

## कुञ्जरगर्जनम्

कुमारसम्भवे महाकाव्ये कार्तिकेयः तारकासुरस्य मारणाय देवैस्सह जगाम । तस्मिन् समये तस्य सैन्यविभागे नैकाः मत्ताः गजाः गम्भीररूपेण गर्जन्ति स्म , तत्र युद्धकाले गजानां गर्जनेन अन्यत् सर्वमपि वाद्यादिकं तिरस्कृताः अभूवन् । उक्तं हि तत्र –

**घण्टारवैः रौद्रतरैर्निरन्तरंविसृत्वरैर्गर्जरवैः सुभैरवैः ।**
**मत्तद्विपानां प्रथयांबभूविरे न वाहिनीनां पटहस्य निःस्वनाः ।। 8**

कालिदासस्य ऋतुसंहारेऽपि वृष्टिवर्णनप्रसङ्गे कालिदासः यथासंख्यालङ्कारमाध्यमेन मत्तगजानां समीचीनं नादं वर्णयति । प्रसङ्गेऽस्मिन् उक्तं यथा –

**वहन्ति वर्षन्ति नदन्ति भान्ति**
**रुदन्ति नृत्यन्ति समाश्रयन्ति ।**
**नद्यो घनाः मत्तगजाः वनान्ताः**
**प्रियाविहीना शिखिनः प्लवङ्गाः ।।9**

एवञ्च मत्तगजानां अन्येषु काव्येष्वपि महाकविः कालिदासः वर्णनं व्यदधात् । परन्त्वत्र स्थालीपुलकन्यायेन किञ्चिदालोचितम् ।

## अश्वहेषितम्

आनन्दसमये क्रोधे च अश्वस्य यः ध्वनिः सः हेषितः, हेषा वा इत्युच्यते । तस्मिन् अश्वहेषितेऽपि सङ्गीतस्य ध्वनिः परिकल्पयितुं शक्यते । कुमारसम्भवे तारकासुरेण सह युद्धसमये प्रस्थानं कुर्वतां देवसेनानाम् अश्वाः तथा भयङ्करेण हेषिताः, मत्तगजाश्च बृंहिताः येन ताडिताः घनाः (वाद्यविशेषाः) अपि तिरोहिताः निःस्वनाः च अभूवन् । प्रसङ्गेऽस्मिन् उक्तं हि-

**महागजानां गुरुबृंहितैस्ततैः सुहेषितैर्घोरतरैश्च वाजिनाम् ।**
**घनै रथानां गुरुचण्डचीत्कृतैस्तिरोहितोऽभूत्पटहस्य निःस्वनः ।। 10**

## मृगाणां सङ्गीतप्रियता

मृगाः सङ्गीतप्रियाः भवन्तीति ज्ञायते।वादोऽस्ति यत् मृगयार्थं ये गच्छन्ति ते यदि सङ्गीतं गायन्ति तर्हि मृगाःआकर्षिताः भवन्ति,तच्छ्रोतुं बहु दूरं गच्छन्तः मृगाः स्वप्राणान् त्यजन्ति। रघुवंशे वाल्मीक्याश्रमे मृगाः यदा किन्नरकण्ठयुक्तलवकुशाभ्यां प्रस्तुतं रामचरितमानसं शृण्वन्ति, तदा ते मन्त्रमुग्धाः निःस्पन्दाश्च अभुवन् । तेन निःस्वन्देन ज्ञायते यत् मृगा अपि सङ्गीतप्रिया एव भवन्ति । उक्तं यथा –

**भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् ।**
**मैथिलीतनयोद्गीतनिःस्पन्दमृगमाश्रमम् ।।11**

## हरिणाङ्गनानां विलोलदृष्टिः तत्र सङ्गीतकलायाः परिकल्पना च

नृत्यसमये नेत्रयोः विविधप्रकारेण सञ्चालनं विधीयते,मानवनर्तकी भवतु पशुजातिर्वानेत्रच्छटा नृत्यस्य एकमङ्गमस्ति । मृगाङ्गनाः नेत्रविलासे विशेषरूपेण निपुणाः भवन्ति। कुमारसम्भवे पार्वती आयताक्षी तथा मन्दपवनैः धूनीतनीलकमलमिव सुन्दररूपेणनेत्रच्छटा प्रकटयति स्म । येन सा मृगाङ्गनया नेत्रच्छटा शिक्षितवती, उत मृगाङ्गनाः पार्वतीतः इति सन्देहो जायते, इत्थमेव मृगाणां वर्णनम् कुमारसम्भवे परिलक्ष्यते।उक्तं यथा –

**प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्याः ।**
**तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ।। 12**

एवञ्च मृगाङ्गनानां विषये तासां सङ्गीतस्य च सङ्केतः नैकेषु पद्येषु कालिदाससाहित्ये परिलक्ष्यते । परन्तु विशेषरूपेण **राजहंस-सारस-सारिका-शुक-मयूर-पारावतादीनां** पक्षिणां वर्णनानि तत्काव्येषु परिलक्ष्यन्ते। तस्योपरि क्वचित् अधस्तान्निरूपयिष्यते ।

## कालिदाससाहित्ये पक्षिणां सङ्गीतकलायाः परिशीलनम्

सङ्गीतं तादृशी रुचिरकला वर्तते, यस्यानुभुतिः न केवलं मानवानाम् अपि तु पशुपक्षिणामपि भवति । आनन्दप्राप्तये न केवलं मनुष्याः अपि तु पशुपक्षिणः अपि सङ्गीतस्य प्रयोगं कुर्वन्तीति महाकविः कालिदासः स्वीयकाव्येषु प्रमाणयति। कालिदाससाहित्ये तेषां पशुपक्षिणां माध्यमेन सङ्गीतकलायाः प्राचुर्येण निरूपणं परिलक्ष्यते ।

संस्कृतसाहित्ये पशुपक्षिणां सङ्गीतविषये नैकानि तत्थ्यानि परिलक्ष्यन्ते। कालिदासीयकाव्येष्वपि तथैव कस्य पशोः पक्षिणः वा सङ्गीतस्य सङ्केतः कथं भवतीति विषयः

कालिदासस्य सर्वेष्वपि काव्येषु विलसति। तस्य महाकवेः कृतिषु येषां पक्षिणां सङ्गीतस्य तथा सङ्गीतप्रियतायाः समुल्लेखः प्राप्यते । तेषां नामानि यथा –

1. मयूरः
2. कोकिलः
3. भ्रमरः
4. राजहंसः
5. सारसः
6. क्रौञ्चः
7. चातकः
8. शुकः
9. सारिका (मैना)
10. पारावतः

प्रसङ्गेऽस्मिन् पक्षिणां सङ्गीतसन्दर्भे गानं नृत्यं च भवति। तदत्र क्वचित् समालोच्यते ।

## षड्जसंवादिनी केकारवः (मयूरः)

मयूरः अस्माकं राष्ट्रियपक्षी भवति।सङ्गीतस्य आद्यस्वरः षड्जस्योत्पत्तिः मयूरेणैव भवतीति स्वीक्रियते। रघुवंशे प्रथमसर्गे एकोनचत्वारिंशत्तमे पद्ये मल्लिनाथटीकायामुद्धृतोऽस्ति । तदुक्तं मातङ्गेन **-षड्जं मयूरो वदति** । मयूरेणोद्भूतध्वनिः केका इत्युच्यते । तथाहि –

**के मूर्ध्नि कायन्ति ध्वनन्तीति केका मयूरवाण्यः ।**
**केका वाणी मयूरस्य इत्यमरः ॥13**

केकाइति पदस्य प्रयोगं महाकविः कालिदासःबहुवारं व्यदधात् । रघुवंशे महाराजः दिलीपः स्वपत्न्या सुदक्षिणया सह स्वगुरोः महर्षिवशिष्ठस्याश्रमं प्रति जगाम , तदा तस्य दिलीपरथस्य ध्वनिं श्रुत्वा मेघध्वनिमिति विचिन्त्य वने मयूराः उद्ग्रीवाः सन्तः सहर्षं केका इति ध्वनिना ननृतुः । यस्य नृत्यस्य केकाध्वनेश्च सम्बादः षड्जस्वरेणाभूत्। एवञ्च केकाध्वनिं श्रुत्वा दिलीपः सुदक्षिणा च मार्गे अगमत्। प्रसङ्गेऽस्मिन् उक्तं यथा –

**मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।**
**षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखण्डिभिः ।।14**

पूर्वस्मिन् पद्ये ' **द्विधा भिन्नाः** ' " **षड्जसंवादिनी केका** "इति पदद्वये संगीतस्य सङ्केतो जायते। अत्र महाकविना कालिदासेन केका इति शब्दस्य वर्णनं कृतं यत् षड्जसंवादिनी वर्तते । तत्तु मयूरस्य ध्वनिरपि अस्ति । तस्य संवादः सङ्गीतस्य षड्जस्वरेण भवति। मयूरादेव षड्जस्योत्पत्तिः स्वीक्रियते । षड्जोत्पत्तेः अपरमपि व्याख्यानं विधाने उच्यते यत् षड्जस्योत्पत्तिः षड्स्थानेभ्यो भवति। तेनैव सङ्गीतस्य प्रथमः स्वरः षड्ज एव । उक्तं हि –

**नासाकण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् ।**
**षड्भ्यः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः ।।15**

प्रियस्य सान्निध्ये यत् विषयसुखमनुभूयते,तदेव प्रियविरहेण सातिशयं दुःखमुत्पादयति,असह्यं च जायते । प्रसङ्गेऽस्मिन् रामः सीतां ब्रूते यत् - सीतायाः विरहेण मयूराणां स्निग्धकेकारूपसङ्गीतध्वनिरपि असह्य आसीत्। उक्तं हि -

**गन्धश्च धाराहतपल्वलानां कादम्बमर्द्धोद्गतकेसरं च ।**
**स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे ।। 16**

महाकविना कालिदासेन उत्तरमेघे पक्षिणां गीतनृत्यादीन् वर्णयन् अलकापुर्य्याः सौन्दर्यं निरूपितम् ।तस्याः अलकायाः अलौकिकसमृद्धिं वर्णयन् केकाध्वनिना मयूराणां नृत्यं स्पष्टयति , अपि च भ्रमराणाम् । तस्मिन् प्रसङ्गे हे मेघ ! यस्याम् अलकायां वृक्षाः नित्यपुष्पाः, अत एवोत्कटमधुकरैः शब्दायमानाः सन्ति। पद्मिन्योऽनवरतपद्माः अत एव हंसपङ्क्तिरचितमेखलाः सन्ति,क्रीडामयूराः सततोज्वलबर्हाः,अत एव केकोत्कण्ठाः सन्ति,रात्रयोऽनवरतचन्द्रिकाः,अत एव निवारितान्धकारव्याप्त्यो रमणीयाश्च सन्ति । उक्तं यथा –

**यत्रोन्मत्तभ्रमरमुखरा पादपाः नित्यपुष्पाः**
**हंसश्रेणीरचितरसना नित्यपद्मा नलिन्यः ।**
**केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा**
**नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ।।17**

पद्येऽस्मिन् ध्यातव्यमेव प्रत्येकस्मिन्नपि पादे यत्किमपि ध्वनिः अभिव्यज्यते । तत्र प्रथमचरणे भ्रमरस्य गुञ्जारसङ्गीतः,द्वितीये हंसकूजितः रसना-क्वणनसङ्गीतः,तृतीये मयूरस्य केकासङ्गीतश्च सुस्पष्टः ।

कालिदासस्य विक्रमोर्वशीये केकाध्वनिना सुदूरं यावत् स्वस्य ग्रीवामुत्थाय मयूराणां वर्णनं नृत्यं च साहित्यरसपिपासकानां मनः आकर्षयति । उक्तं हि –

**आलोकयति पयोदान् प्रबलपुरोवातनर्तितशिखण्डिः ।**
**केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ।। 18**

मृदङ्गवादनमेव मेघगर्जनमिति विचिन्त्य मयूराणाम् उद्ग्रीवया नृत्यं तथा त्रिपुष्करः (मृदङ्गोपरि) प्रस्तूयमानायाः मायूरीमार्जनायाः अतीव रमणीयः प्रसङ्गः मालविकाग्निमित्रे परिलक्ष्यते। तत्र मालविका नृत्यं प्रारब्धुमिच्छति। ततः प्राक् त्रिपुष्करो वाद्योपरि मायूरीमार्जनायाः वादनं भवति। तच्छ्रुत्वा मयूराः मेघगर्जनस्य प्रतीतिमादाय उद्ग्रीवाः सन्तः केकाध्वनिरूपं सङ्गीतं प्रारभन्ते। मयूराणां कृते प्रियस्तथा मध्यमग्रामे निबद्धा मायूरीमार्जना जनान् आनन्दयति। उक्तं हि –

**जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य ।**
**निह्लादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ।। 19**

पद्यस्यास्य साङ्गीतिकं सौन्दर्यं निश्चप्रचं प्रमाणीकर्तुं शक्यते ।

भ्रान्तिः विचित्ररूपा भवति । भ्रान्तिवशात् भ्रमराः मयूरस्य कलापं नीलकमलमिति चिन्तयन्ति। मानवाः क्वचित् भ्रमवशात् विचित्ररूपेणैव व्यवहरन्ति। किमुच पशुपक्षिणाम् । सूर्यमण्डलमपि आवृत्तये समर्थस्य कार्तिकेयस्य सेनानां धूलिभिःपरिवृत्तमाकाशं दृष्ट्वा हंसानां वृष्टिभ्रमः येन मानसरः प्रति ते हंसाः प्रस्थिताः । तथा मयूराः वृष्टिभ्रमात् ननृतुः । तत्र केवलं वर्षाऋतोः भ्रमान्मयूराः अनृत्यन् । तथाहि –

**घनैर्विलोक्य स्थगितार्कमण्डलैश्चमूरजोभिर्निचितं नभःस्थलम् ।**
**अयायि हंसैरभिमानसं घनभ्रमेण सानन्दमनर्ति केकिभिः ।। 20**

## पुंस्कोकिलकूजितः कोकिलारवश्च

सर्वेष्वपि पक्षिषुगानस्य कृते सर्वाधिकरूपेण कोकिलः कोकिला च सुप्रसिद्धं स्थानमवाप्नुवन्ताम् । वसन्तऋतौ कोकिलानां सुमधुरं सङ्गीतं सर्वत्र दिक्षु व्याप्नोति। आम्रमञ्जर्याः रसपानेन कोकिलः मत्तः भवति। सः तदानीं कामोद्दीपकश्च भवति। तेनैव सः स्वप्रियां चुम्बति। प्रसङ्गेऽस्मिन् उक्तं हि –

**पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः ।21**

तत्रैव ऋतुसंहारे आम्रमञ्जर्य्याः रसेन रचितस्य आसवस्य पानं कृत्वा सः कषायकण्ठः सन् गायाति । उक्तं हि –

**रम्यः प्रदोषसमयः स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।**
**मत्तालियूथविरुतं निशि शीधुपानं सर्वं रसायनमिदं कुसुमायुधस्य ।।22**

कालिदाससाहित्ये इतोऽपि नैकेषु काव्येषु तस्य कोकिलस्य सुमधुरगानं परिस्फुरति । तत्सर्वमपि शोधपत्रविस्तारभयादत्र चर्चा नैव विधीयते । सङ्गीतशास्त्रे सङ्गीतस्य कृते तदर्थमेव कोकिलस्वर इति व्यवहारः क्रियते।

## भ्रमरस्वनगीतिः

भ्रमरः तादृशः जन्तुविशेषः यः उद्यानेषु पुष्पाणामुपरि उपविश्य गुञ्जति।सः पुष्पाणां रसपाने मत्तो भवति,मधुरं गुञ्जति च । तस्य सुमधुरगुञ्जरेण कवयः मधुरसङ्गीतस्य परिकल्पनां कुर्वन्ति। ऋतुसंहारे तस्य भ्रमरस्य गानं वर्णयन् महाकविः ब्रूते- यथा मानवैः प्रयुक्तस्य गीतस्य नादः प्रभावी भवति,तद्वत् भ्रमराणां गुञ्जारः (गुञ्जनम्) रूपं नादोऽपि साफल्यं जनयति । तत्र महाकविः कालिदासः गीतनादयोः द्वयोरपि सङ्गीतशास्त्रस्य पदयोः प्रयोगं विदधाति। उक्तं हि –

**आकम्पितानि हृदयानि मनस्विनीनां**
**वातैः प्रफुल्लसहकारकृताधिवासैः ।**
**उत्सूजितैः परभृतस्य मदाकूलस्य**
**श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ।।23**

कालिदाससाहित्ये भ्रमरः तथा तस्य गुञ्जनस्य (गानस्य) विषये कालिदासेन अधोलिखितानि पदानि प्रयुक्तानि । तथाहि -

1. भृङ्गः - स्वनः
2. षड्पदः - कूजितम्
3. मधुकरः - नादः
4. भ्रमरः - विरुतम्
5. द्विरेफः - निःस्वनः
6. अलिः - उपगीतम्
7. मधुपः - गीतम्

## हंसकूजितम्

हंसः तादृश एकः पक्षी भवति,यः पुष्करिणी ,सरित् समीपे च निवसति। स च शुक्लवर्णोऽस्ति। शरत्काले स सातिशयम् आनन्दितो भवति । सः मत्तेन मधुरं कूजितरूपं सङ्गीतं गायति । कालिदासस्य ऋतुसंहारे शरत्काले हंसः मत्तेन मधुरं कूजनरूपं सङ्गीतं करोतीति वर्णितम् । तच्छ्रुत्वा जनाः हर्षिताः प्रफुल्लिताश्च भवन्तीति वर्णितं महाकविना ।

एवञ्च हंसैःव्याप्ताः सारसकूलाः सीमान्तप्रदेशे कूजन्ति। येन नराः प्रमोदाः भवन्ति । उक्तं यथा –

**कुर्वन्ति हंसविरुतैः परितो जनस्य**
**प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ।**
**हंसैः ससारसकुलैः प्रतिनादितानि**
**सीमान्तराणि जनयन्ति नृणां प्रमोदम् ।। 24**

## सारसकूजितः

सारसः बहुधा पुष्करिणीषु अथवा जलाशये सरित्सु च निवसति। स च पक्षी पङ्क्तिबद्धरूपेण तिष्ठति । सारसपक्षिभिः व्याप्तं सरः सरित् भवति। तथा तैः सारसपक्षिभिः कूजितसङ्गीतेन प्रतिनादितः सीमान्तप्रदेशे आनन्दितो भवति। प्रसङ्गेऽस्मिन् उक्तं यथा –

**कारण्डवाननविघट्टितवीचिमालाः**
**कादम्बसारसकुलाकुलतीरदेशाः ।**
**कुर्वन्ति हंसविरुतैः परितो जनस्य**
**प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ।।**

**हंसैः ससारसकुलैः प्रतिनादितानि ।**
**सीमान्तराणि जनयन्ति नृणां प्रमोदम् ।। 25**

## चातकनादे सङ्गीतम्

चातकः कश्चन तादृशः पक्षिविशेषः भवति,यः केवलं वृष्टिसमये मेघात् पतितं जलमेव पिबति। यदि तज्जलं नीचैः पतति,तर्हि सः तत् नैव स्वीकरोति। अत एव वृष्टिकाले मेघैस्सह एतस्य विशेषसम्बन्धो दृश्यते । यदि कविः कुत्रचित् काव्येषु वृष्टिकालं वर्णयति,तर्हि चातकपक्षिणः वर्णनमवश्यमेव विदधाति।

चातकपक्षी वृष्टिकाले विशेषरूपेण मनोहरनादध्वनिः करोति। एतस्य पक्षिणः स्वरः मङ्गलसूचको भवति। ऋतुसंहारे चातकस्य सुमधुरस्वनस्य विषये निरूपितं कालिदासेन यथा –

**तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बनः ।**
**प्रयान्ति मन्दं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ।।26**

## शुकगीतम्

प्राचीनकालादेव गृहे पालितपक्षिषु अतीव सुन्दरं, शोभनं,मनुष्यवाण्या च निगदितं स्वरयुक्तं पक्षी शुको भवति। श्रुतमपि कापि वाणी पुनरेव एकबारमावृत्तिं विदधाति सः । तदेव तस्यापरं वैशिष्ट्यं भवति।

रघुवंशे पञ्चमसर्गे अजस्य पार्श्वे विद्यमानः शुकः पञ्जरे स्थित्वा सातिशयं मधुरवाण्या किमपि भासते । तत्र अजस्य प्रबोधनाय प्रयुक्तस्तुतिगीतेन शुकः तमजम् आनन्दयति । उक्तं यथा –

**भवति विरलभक्तिर्म्लानपुष्पोपहारः**
**स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।**
**अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता**
**मनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ।। 27**

## सारिकायाः सङ्गीतम्

सारिका इति पक्षिणः अपरं नाम मैना वर्तते। यः सुमधुरं कूजति। शुकसारिकयोः पालनं जनाः स्वगृहे मनोविनोदार्थमेव कुर्वन्ति। मेघदूते उत्तरमेघे विरही यक्षः मेघं ब्रूते यत् त्वं मम प्रियां द्रक्ष्यसि । या पञ्जरे स्थितां सारिकां क्वचित् अपृच्छत् रे सारिके ! किं त्वं कदाचित् स्वप्रियं स्मरसि वेति? यतोहि त्वं तस्य (प्रियतमस्य) प्रियाऽसि । विरहेण दुःखेन वा पशुपक्षिभिस्सह वार्तालापं स्वाभाविकं भवति। यक्षेन पोषितसारिका मधुरवचनास्ति। तस्याः वाणी एव सङ्गीतरूपा भवति । उक्तं यथा –

**आलोके ते निपतति पुरा सा बलिव्याकुला वा**
**मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।**
**पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां**
**कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ।।28**

## पक्षिणां शोकगीतम्

मानवानामिव पशुपक्षिणोऽपि विवेकशालिनः भवन्ति।स्वस्य निजस्वामिनः वा दुःखेन ते पीडामनुभवन्ति। एकदा उपवने भ्रमन्त्याः इन्दुमत्याः दिवंगमने तस्याः अजस्य च समीपे विद्यमानाः सर्वेऽपि लोकाः अक्रन्दन् । तेषां करुणक्रन्दनं श्रुत्वा तेन पीडिताश्च पक्षिणः दुःखमनुभवन्तः रोदनमकुर्वन् । अनेन तेषां पक्षिणामपि परस्परं भावः अभिव्यज्यते। उक्तं हि-

**उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।**
**विहगाः कमलाकरालयाः समदुःखाः इव तत्र चुक्रुशुः ।।29**

## उपसंहारः

एवञ्च महाकवेर्कालिदासस्य नैकेषु काव्येषु पशुपक्षिणां नादः, स्वनः, गीतञ्च परिलक्ष्यते। यदि सूक्ष्मातिसूक्ष्मं विचारयामस्तर्हि स च महाकविः न केवलं साहित्यिकः नैयायिकः, मीमांसकः, दार्शनिको वा अभूत् , अपि तु सङ्गीतशास्त्रेऽपि महाकवेर्कालिदासस्य गूढरूपेण ज्ञानमासीत् । सः महाकविः सङ्गीतविद्यायामपि निपुणः अभूदिति विषयः शोधपत्रेऽस्मिन् प्रमाणीकृतः ।सङ्गीतशास्त्रज्ञरूपेण कालिदासस्य स्थानं संस्कृतवाङ्मये सर्वोपरि भवितुमर्हतीतिकथने नातिशयोक्तिः। इति शम् ।।

## शब्दसङ्केताः

मेघ.- मेघदूतम्
ना.शा – नाट्यशास्त्रम्
सङ्गीत. – सङ्गीतदर्पणः
सङ्गीत.रत्ना – सङ्गीतरत्नाकरः
नीति.श – नीतिशतकम्
कुमार. – कुमारसम्भवम्
मालविका. - मालविकाग्निमित्रम्
विक्रम. – विक्रमोर्वशीयम्
रघु. - रघुवंशम्
नैषध. – नैषधीयचरितम्
ऋतु. – ऋतुसंहारम्
सङ्गीत. - सङ्गीतदर्पणः

## पादटीप्पणीः

1. मेघ. – 1.60
2. ना.शा –1.11
3. ना.शा – 1.50
4. सङ्गीत. –170-171
5. सङ्गीत.रत्ना – 1.21

15. रघु. – 1.39 (मल्लिनाथटीकायाम्)
16. रघु. 13.27
17. मेघ. 2.3
18. विक्रमो. 4.8
19. मालविका. 1.21

6. नीति.श – श्लोकः -12
7. नैधष- 1.102
8. कुमार.-14.47
9. ऋतु.- 2.19
10. कुमार.14.33
11. रघु.15.37
12. कुमार. – 1.46
13. रघु.1.39 (मल्लिनाथटीकायां पृ - 16)
14. रघु.- 1.39
20. कुमार. – 14.35
21. ऋतु. – 6.16
22. ऋतु. – 6.38
23. ऋतु. 6.23
24. ऋतु. - 3.8-9
25. ऋतु. – 3.8-16
26. ऋतु. – 2.3
27. रघु. 5.74
28. मेघ. – 2.24
29. रघु. – 8.39

## कालिदाससाहित्ये सङ्गीतसम्बन्धपारिषाङ्किकशब्दनां सूची

| | |
|---|---|
| सङ्गीतम् | प्रबोधनगीतम् |
| गायनम् | मङ्गलतूर्यः |
| वादनम् | नादः |
| वीणा | रागः |
| तूर्यः | आलापः |
| त्रिपुष्करमृदङ्गः | घण्टा |
| स्वरः | तालः |
| घनवाद्यम् | लयः |

## सहायकग्रन्थसूची

1. अमरकोषः.अमरसिंहः. निर्णयसागर प्रकाशन,बम्बइ.1969
2. नाट्यशास्त्रम्.भरतमुनिः.(सम्पा)प्रो.बाहुलाल शुक्ल शास्त्री.चैखम्बा संस्कृत सीरिज् आफिस्.वारणासी.1972
3. नैषधीयचरतम्.श्रीहर्षः.(सम्पा)प.हरगोविन्दशास्त्री.चौखम्बा संस्कृत सीरिज् आफिस्.वारणासी.1954

4. नीतिशतकम्.भर्तृहरिः.चौखम्बा सुरभारती प्रकाशन.वारणासी.1982
5. ऋतुसंहारः.कालिदासः.(सम्पा) प्रो.रेवाप्रसाद द्विवेदी.काशी हिन्दु विश्वविद्यालय.वारणासी.1976
6. कुमारसम्भवम्.कालिदासः. (सम्पा)डा.गौतम वाडीलाल पटेल्.अहमदावाद.गुजराट.
7. मालविकाग्निमित्रम्.कालिदासः.(व्याख्या) अप्पाशास्त्री राशिवडेकर्.लक्ष्मीवेङ्कटेश प्रेस्.बम्बइ.1959
8. मेघदूतम्.कालिदासः.(सम्पा)एम्.आर् काले.मोतीलाल बनारसी दास.दिल्ली.1974
9. कालिदास ग्रन्थावली . (सम्पा) सीताराम चतुर्वेदी.अखिल भारतीय विक्रम परिषद्.काशी . 2007
10. रघुवंशम्.कालिदासः (सम्पा) गोपाल रघुनाथ नन्दार्गीकर.मोतीलाल बनारसी दास.दिल्ली.1982
11. विक्रमोर्वशीयम्. कालिदास.(सम्पा) सी.आर्.देवधर्.मोतीलाल बनारसी दास.वारणासी.1982
12. सङ्गीतदर्पणः.दामोदरपण्डितः(सम्पा)पं विश्वम्भर नाथ भट्ट. सङ्गीतकार्यालय.हाथरस.1950
13. सङ्गीतरत्नाकरः शाङ्र्गदेवः(प्रथमो भागः) (सम्पा) पं. एस्. सुब्रह्मण्यम शास्त्री.अड्यार लाइब्रेरी.1943
14. सङ्गीतरत्नाकरः शाङ्र्गदेवः(द्वितीयो भागः) (सम्पा) पं. एस्. सुब्रह्मण्यम शास्त्री.अड्यार लाइब्रेरी.1944
15. कालिदास साहित्य एवं पशु पक्षि सङ्गीत.डा.सुषमा कुलश्रेष्ठः.ईस्टर्न बुक् लिंकर्स.दिल्ली.1990